No. ४६३४

Title भविष्योत्तर पुराणे ऋषिपञ्चमी व्रतोद्यापनम्

Author ×

Extent ६ पत्राणि Age ×

Subject पुराण माहात्म्यादि

𑆉𑆰𑆴𑆥𑆚𑇀𑆖𑆩𑆵𑆮𑇀𑆫𑆠𑆾𑆢𑇀𑆪𑆳𑆥𑆤𑆩𑇀

𑇕𑇖𑇓𑇕

॥श्रीगणेशायनमः॥ सप्तर्षयः कश्यपश्रेष्ठाः सर्वेषांच शुभप्रदाः॥ सर्वपापंव्यपोहंतु ज्ञानताज्ञानतःकृतं॥ कश्यपोत्रिर्भरद्वा
जो विश्वामित्रोथ गौतमः॥ जमदग्निर्वसिष्ठश्च साध्वीचैवाप्यरुंधती॥ नमो ब्रह्मण्यदेवाय ब्रह्मणे सोमउत्तमं॥
सूर्यकोटिप्रतीकाशं सप्तर्षिवृंदं विचिंतयेत्॥ ध्यानं॥ आगच्छंतु महाभागाश्चातुर्वेदस्वरूपिणः॥ यावद्व्रतमहंकु
र्वे तूपयाभवतस्थिराः॥ आवाहनं॥ ऋग्यजुःसामवेदानां स्वरूपेभ्यो नमो नमः॥ पुराणपुरुषेभ्योहि देवर्षिभ्यो नमो
नमः॥ आसनं॥ गंगादुग्धासुतोपेतं पाद्यं गृह्णंतु भो द्विजाः॥ प्रसादं कुरुत ज्ञातारः कृपाः संतु सदा मम॥ पाद्यं॥ न
मस्ये भृगुकृपंचमणामर्चिता ऋषिसत्तमाः॥ गृह्यापाद्यं तु मे सर्वे गृह्णंत्वर्घ्यं नमो नमः॥ अर्घ्यं॥ मंदाकिनी गौत
मी च यमुना च सरस्वती॥ ताभ्यो आनीतमयानीतं स्नानार्थं प्रतिगृह्यतां॥ स्नानं॥ लोकानां तुष्टिकर्त्ता [illegible]
तपोधनाः॥ नमश्चारित्रनिलेभ्यो महर्षिभ्यो नमो नमः॥ आचमनीयं॥ सर्वेनिसंततपोनिष्ठा ब्रह्मज्ञाः सत्यवादि
नः॥ वस्त्राणि प्रतिगृह्णंतु मुक्तिदाः संतु मे सदा॥ वस्त्रं॥ यज्ञोपवीतमिति यज्ञोपवीतं॥ कुंकुमागरुकस्तूरी सुगंधै
र्मिश्रितं शुभं॥ गंधाढ्यं चंदनं दिव्यं गृह्णंतु ऋषिसत्तमाः॥ गंधं॥ रंजितः कुंकुमौघेन अक्षताश्च सुशोभनाः॥ गृह्णं
तु मम संतुष्टाः प्रसन्ना ऋषिसत्तमाः॥ अक्षताः॥ मालतीचंपकादीनि माल्यादीनि वि[illegible]नमः॥ मयाहृतानि दे
वाः पुष्पाणि प्रतिगृह्यतां॥ पुष्पं॥ वनस्पतिरसोद्भूतो गंधाढ्यः सुमनोहरः॥ आघ्रेयः सर्वदेवानां धूपोयं

प्रतिगृह्यतां॥ धूपं॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापह॥ दीपं॥
३ नानापक्वान्नसंयुक्तं रसैः षड्भिः समन्वितं॥ नैवेद्यमक्षयः सर्वे गृह्णन्तु मुक्तिदायकाः॥ नैवेद्यं॥ पूगीफलं महद्दि
व्यं नागवल्ली दलैर्युतं॥ कर्पूरादिसमायुक्तं तांबूलं प्रतिगृह्यतां॥ तांबूलं॥ नमो वेदविधिः श्रेष्ठा चरणाय स्वरूपं
संनिभाः॥ गं॥ इदं फलं तु ष्टा मया दत्तां हि मत्कृतः॥ फलं॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनं
तपुण्यफलदमतः शांतिं प्रयच्छ मे॥ दक्षिणां॥ नमोऽस्तु ऋषिवृंदेभ्यो ब्रह्मर्षिभ्यो नमो नमः॥ सर्वपापह
रेभ्यो ह्य वेदविद्भ्यो नमो नमः॥ नमस्कारः॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः॥ यत्पूजितं मया
विप्राः परिपूर्णं तदस्तु मे॥ प्रार्थना॥ न्यूनातिरिक्तानि स्फुरंति यानीह कर्माणि मया कृतानि॥ क्षम्याणि
चैतानि मम क्षमध्वं प्रयात तुष्टाः पुनरागमाय॥ विसर्जनं॥ एवं संपूज्य विधिवद्भक्तियुक्तेन चेतसा॥
तेषामग्रे तु श्रोतव्यमिदं चैव कथानकं॥ अथ कथा ब्रह्मोवाच॥ अन्यामपि चरालेंद्र पंचमीं ऋ
षिसंज्ञिकां॥ कृत्वा यामिच यां कृत्वा नारी पापात्प्रमुच्यते॥ युधिष्ठिर उवाच॥ कीदृशी पंचमी देव
कथं वा ऋषिसंज्ञिका॥ पापात्कस्मात्प्रमुच्येत नारी यदुकुलोद्वह॥ पापानि सुबहून्यत्र विद्यंते
कथं वा ऋषिपंचम्याः कस्मात्पापात्प्रमुच्यते॥ कृष्ण उवाच॥ अज्ञानाद्यदि वा रामजी
॥ १

इत्याख्या स्त्रीजाता रजस्वला॥ यदा स्पृष्टा तु भाण्डादीन् गृहकर्माणि संस्थिता॥ प्राप्नोति सा महापापं सत्यं वै नर
कं व्रजेत्॥ शृणु तत्कारणं यस्मादाख्याता स्त्रीजाता रजस्वला॥ श्रोतव्या दूरतः सापि चातुर्वर्ण्येन भारत॥
वृत्रं हत्वा पुरा शक्रो वृत्रं हत्वा महासुरं॥ पापात्सार्धं नृपशार्दूल पीडितो वृत्रसूदनः॥ ब्रह्माणं सहसा
गच्छदाक्रान्तो वृत्रहत्यया॥ शुद्धिं च प्रार्थयामास तदा शक्रः पितामहं॥ ततो देवैः समं ब्रह्मा क्षणं ध्यात्वा
सनातनी॥ शुद्धिं शक्रस्य राजेन्द्र चकार विधिवत्स्तुतः॥ विभज्य ब्रह्महत्यां च चतुर्धा चिन्तलुर्सुरैः॥
अग्निषु प्रथमं शार्दूल चतुःस्थानेषु वै तदा॥ वृक्षेषु प्रथमं जाता सुज्वाला सु च नदीषु च॥ पर्वतेषु तथा शा
ज्ञ्या शरीरजसि पार्थिव॥ ततो रजस्वला नारी प्रोक्ता यत्नेन यत्नतः॥ ब्रह्मणः शासनात्सार्धं चात
वर्णेन सर्वदा॥ प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी॥ तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्य
ति॥ अज्ञानाज्ज्ञानतो वापि संपर्कात्त्वतिपातकं॥ तत्पापसंक्षयार्थं वै कार्यं चर्षिपञ्चमी॥ सर्वपा
पप्रशमनी सर्वोपद्रवनाशिनी॥ ब्रह्मक्षत्रियवैश्यानां स्त्रीभिः कार्या प्रयत्नतः॥ अथान्यदपि ते
राजन् विदर्भायां बभूव ह॥ सेनजिन्नाम राजर्षिश्चातुर्वर्ण्यानुपालकः॥ तस्य देशे वसद्विप्रो वे

वेदांगपारगः॥ सुमित्रो नाम राजेन्द्रः सर्वभूतहिते रतः॥ क्षत्रियधर्मं सदा तिष्ठन्कुटुंबं परिपालयन्॥ तस्य भार्या सु
साध्वी च पतिशुश्रूषणे रता॥ जयश्री नाम विख्याता बहुसत्त्वसुहृज्जना॥ अतिचिंतान्विता सा च प्रा
वृद्धकाले सुमध्यमा॥ क्षेत्रादिं निरतातीव व्याकुलीकृतमानसा॥ पुत्रदा चासनः प्राप्तं अन्यतु कालमनोकं तू
रजस्वलापि सा राजन्गृहकर्म चकार ह॥ भांडादीन्स्पृ... ॥ न्यस्पृशद्भाजनं अन्यततो डामे तु म
मिनी॥ कालेन बहुना साध्वी पंचत्वमगमत्तदा॥ भार्यातस्य सुमित्रस्य च तु संपर्कदोषतः॥ शुनीयोनिम
मुत्पन्ना शुनी चाभून्नरेश्वर॥ तस्याः संपर्कदोषेण तद्भर्ता सुरभीसुतः॥ सुमित्रः स बभूवाथ बलीवर्द
सुतालये॥ एवं तौ दंपती राजन्स्वकर्मवशगौ तदा॥ अन्यतु संपर्कदोषेण तिर्यग्योनिमुपागतौ॥ स्वधर्म
रणाज्ज्ञातावुभौ जातिस्मरौ तथा॥ सुतस्य वै गृहे राजन्स्मरतो पूर्वपातकं॥ सुमित्रस्य च महद्गुरुशुश्रूषणे रतः॥
सुमतिर्नाम धर्मज्ञो देवतातिथिपूजकः॥ अपक्षयाहे संप्राप्ते पितुस्तस्य सुमतिस्तदा॥ भार्यां चंद्रवती नाम प्रो
वाच श्रद्धयान्वितः॥ अद्य सांवत्सरं दिनं पितुर्मे चारुहासिनि॥ भोजनीया द्विजाः सुपक्वपाकसु
सिद्धिं विधीयतां॥ सा तद्वचनमाकर्ण्य पाकं चक्रे शुचिस्सती॥ ततः सर्पेण गरलं निक्षिप्तं पायसे नृप॥ त

राम
॥२॥

दृष्टं चैव यत्तत्स्यादूरादि लांछिता ॥ ततो कालवशाद्धी तास्मुनी पस्पर्श पायसं ॥ ददृशाचंद्रवतीको ध्यादु ल्मुकेन
भक्षितान्तं ॥ स कृपापा कं च तं सर्वं पुनः पाकं च कारसा ॥ ततः सुमति नाम तत्राश्राद्धं दत्ता विजाने ततः ॥ ब्रा
ह्मणा भोजितास्तत्र भुक्ता बंधुजनैः सह ॥ उच्छिष्टं किंचिदुच्छिष्टं बहिः श्राद्धीयमिसुता ॥ बध्वा च कुड्
या तस्यै ग्रासमात्रं न चार्पितं ॥ ततो रात्र्यां प्रवृत्तायां सा शुनी क्षुधितातुरा ॥ सर्वं लोकेषु सुप्तेषु
जनतत्र च निद्रया ॥ बलीवर्दमुपागम्य भर्त्तारमिदमब्रवीत् ॥ बुभुक्षिताऽस्य नाथाहं नदत्तं चान्
नमेव मे ॥ ग्रासादिकं च बध्वा वै क्षुधा मां बाधते बलात् ॥ अन्यस्मिन्दिवसे पुत्रो मम हेतं ददाति
मे ॥ अद्य मम स्वं किमन्येषु उच्छिष्टमपि नो दत्तं ॥ पायसान्तो पपाताद्य गरलं सर्पसंभवं ॥ मया वि
चिंतितमपायं मरिष्यंति द्विजोत्तमाः ॥ स्पृष्टं तु पायसे रोषात् बध्वाहं ताडिता भृशं ॥ दुखितं तेन गात्रं
मे कटिर्भग्ना करोमि किं ॥ ततः प्राह स चानड्वान् भद्रे तेय ल्हुते सति ॥ किं करोमि स्वयं च कस्य भा
ाहो प्य संस्थितः ॥ अद्याहं मालजंधने त्रे भ्रामितः सकलं दिनं ॥ ना हितो ध्यालजे नाहं सुखं व
द्धा बुभुक्षितः ॥ तथाप्यश्राद्धकृते तेन हा जाता मम कस्य ता ॥ श्रीकृष्ण उवाच ॥ तयोयोः संवदतो

एवं मातापित्रोस्तु स्मरता ॥ शुश्राव पुत्रस्तद्वाक्यं यदुक्तं वै तदा तयोः ॥ अपरात्र्यां व्यतीतायामुदिते सूर्यमंड
ले ॥ पितरौ तावपि ज्ञाय दत्तवानन्नमुत्तमं ॥ ततः सोऽदुःखितः पुत्रो ज्ञात्वावस्थां तदा तयोः ॥ मातापित्रो
स्तु राजेंद्र तदा सोऽप्रस्थितो वनं ॥ तत्र गत्वाऽज्ञानवृद्धान् ऋषीन्परमधार्मिकान् ॥ प्रणिपत्याह तत्रा
स्माहि तं चैव तदा तयोः ॥ सुमतिरुवाच ॥ केन कर्मविपाकेन पितरौ मे तपोधनाः ॥ इमामवस्थां सं
प्राप्तौ मुच्येते पातकात्कथं ॥ ऋषिरुवाच ॥ तदाकर्ण्य वचस्तस्य सुमतेर्दुःखितस्य च ॥ ऋषिः सर्व
ज्ञानसर्वज्ञः करुणान्वितः ॥ सुतपा उवाच ॥ तव माता पुरा विप्र स्वगृहे बालभावतः ॥ प्राप्तं ऋ
तुं विदित्वा तु संपर्कमकरोद्द्विज ॥ तेन कर्मविपाकेन शुनीयोनिमुपागता ॥ पितापि स्पर्शदोषेण ब
लीवर्दत्वमिह वह ॥ एतयोर्मुक्तिकामाय कुरु त्वमृषिपंचमीं ॥ भार्यया सह विप्रेंद्र ऋषीन्संपूज्य भ
क्तितः ॥ आचरस्व व्रतं तत्र सप्तवर्षं द्विजोत्तम ॥ अंते चोद्यापनं तस्य कुर्याद्वित्तशाठ्यविव
र्जितः ॥ शाकाहारस्तु कर्तव्यः श्यामाकाहार एव वा ॥ नीवारैर्वापि कर्तव्यं कृष्टपच्यं न भक्षयेत् ॥

अथ भाद्रपदे मासि सुक्लपक्षस्य पंचमी॥ तस्यां मध्याह्नसमये नद्यादौ विमले जले॥ स्नात्वा पामार्ग[redacted]स
मिधा दंतधावनमादितः॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्प
ते॥ संप्राप्यनेन मंत्रेण कुर्याद्वै दंतधावनं॥ मुखदुर्गंधिनाशाय दंतानां च विशुद्धये॥ ष्ठीवनाय
च गात्राणां कुर्वेहं दंतधावनं॥ अनेन दंतान्संशोध्य स्नायात्म स्नानपूर्वकं॥ तिलामलककल्केन के
शान्संशोध्य यत्नतः॥ परिधाय नवे शुद्धे वाससी सुसमाहितः॥ पूजयेच्च ऋषीन्दिव्यान्गंधपुष्पैः समन्वि
तान्॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गौतमः॥ जमदग्निर्वशिष्ठश्च साध्वी चैवाप्यरुंधती॥ मंत्रे
णानेन संपूज्य सर्वान्पूजयेत्सुसमाहितः॥ अनेन ऋषिपंचम्याः व्रतेनैव द्विजोत्तम॥ ऋतुसंपर्कजो दोष
स्य यथा तिन संशयः॥ श्रीकृष्ण उवाच॥ अथात्र दर्पितेरा जन्म इतिहासं पुरातनं॥ वशिष्ठ सर्वविधा
ने व्रत कौतुकमद्भुतं॥ १॥ विदेहे तु द्विजवरो उत्तुंगो नाम नामतः॥ तस्य भार्या सुशीले[illegible]ति पातिव्र
त्यपरायण॥ तस्यापि संयुगुलं पुत्रोहि सुविचक्षणः॥ अधीतवान्सतस्तस्य वेदान्सांगपदक्रमान्
ममाने च कुले तस्यां सुता चैव विनाहिता॥ विवाहिता च सा दैवी वैधव्यं प्राप्य सत्वरं॥ ४॥ सा ती

यालयं तीसा स्थिता निजपितुर्गृहे। तस्या दुःखेन संतप्तः सुतं संस्थाप्य वेश्मनि ॥५॥ गंगातीरे च संप्राप्तः
स कुलत्रस्य या सह ॥ स तत्राध्यापयामास शिष्यांश्च वेदविदोत्तमः ॥६॥ सुता च कुरुते तस्य पितुः शुश्रू
षणं परं ॥ पितुः शुश्रूषणं कृत्वा परिश्रान्ता कदाचन ॥७॥ निशीथे किल संसुप्ता क्रिमिराशिरजायत ॥ तथा
विधां च तां दृष्ट्वा विवस्त्रां प्रस्तरे स्थितां च ॥ शिष्या निवेदयामासुस्तस्मात्ते करुणान्विताः ॥ नजाती
मो बयं किंचिद्दूषी साध्वी पतिव्रता ॥९॥ क्रिमिराशिमयी जाता मातः संप्रति दृश्यते ॥ वज्रपातसमा ज्ञा
ता कृता शिष्यैर्निवेदिता ॥१०॥ संभ्रान्ता मनसा शीघ्रं तां समीपमुपागता ॥ सुतां तथाविधां दृष्ट्वा
विलप्यातिसुदुःखिता ॥११॥ उरश्च ताडयामास सुतरां मोहमाययौ ॥ क्षणेन प्राप्य चेतन्यं तामु
त्थाप्य प्रयत्नतः ॥ समालंब्य च बाहुभ्यां निन्ये तत्पितुरंतिकं ॥ स्वामिन् कथय मे साध्वी केन दुष्कृतक
र्मणा ॥१३॥ निशीथे संप्रसुप्तेयं जाता वै क्रिमिसंकुला ॥ एतच्छ्रुत्वा ततो वाक्यमृषिर्ध्यानपरायणः ॥१४॥
तस्यै निवेदयामास तस्याः प्राक्कृतचेष्टितं ॥ ऋषिरुवाच ॥ प्रागियं सप्तमेतीते जननी ब्राह्म
णी शुभा ॥१५॥ नो संसारस्वभावेभ्यः संजातापि रजस्वला ॥ तस्यास्तत्पापभावेन जाता वै क्रिमि

तथा

तद्वपुः॥१६॥ रजस्वपापेन युक्ता भवति नान्यदा॥ तथा तया सखीसंगाद्व्रतं दृष्ट्वावमानितं॥१७॥ दृष्ट्वा व्रतप्रभावेन नै
न जाता द्विजकुले मम॥ अवमानाद्व्रतस्यास्य किं भिरा शिर भूतदा॥१८॥ एतत्ते कथितं सर्वं कारणं कुल्पकै हते
सुशीलोवाच॥ दर्शनेनापि नाथस्य विप्राणां विमले कुले॥ जन्म युष्माद्विधा नारी जायते ब्रह्मतेजसा॥ अ
स्याः प्रजातं तेस्य देहे किं भिराशयः॥२०॥ महाश्चर्यकरं वाप्य तद्व्रतं कथयस्व मे॥ ऋषिरुवाच॥ सुशीले
श्रुणु तत्सम्यग्व्रतानामुत्तमं व्रतं॥२१॥ येन चीर्णेन सहसा सर्वपापैः प्रमुच्यते॥ दुःखं न याभिधाला ग
जायते नात्र संशयः॥ कल्याणानि विवर्द्धन्ते संपदश्च निरापदः॥ नभस्ये शुक्लपक्षे तु यदा भवति पंचमी॥
यथ्यादिकं तथा स्नात्वा स्नानं नियममेव च॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा चैव वरानने॥२३॥ स्नानेनैव नवं
कर्म गत्वा निजगृहे पुनः॥ वेदीं सम्यक्प्रकुर्वीत गोमयेनोपलेपयेत्॥२४॥ रंगवल्लीसमायुक्तां नाना
रत्नोपशोभितां॥ तत्र सप्त ऋषीन्दिव्यान्भक्तिकः परिपूजयेत्॥२५॥ स्नानैर्गंधैश्च पुष्पैश्च धूपदीपैः सु
शोभनैः॥ ततो नैवेद्यसंपूर्णमर्घ्यं दद्याच्छुभैः फलैः॥२६॥ मंत्रेणानेन विधिवन्नृषीनुद्दिश्य भक्तितः॥ अ

र्षिमंत्रैः॥ कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः॥ जमदग्निर्वशिष्ठश्च साध्वी चैवाप्यरुन्धती॥ गृहीत्वा
र्घं नमश्चयः स्नानं भवेत्सर्वदा॥ एवं पूजां मुनिर्वह्न ऋषीन् ध्यायेत्समाहितः॥ अरुन्धतीसंज्ञात शाका
हारं प्रकल्पयेत्॥ ऋक्पुष्पादिमाख्यानं श्रद्धाभक्तिसमन्वितः॥ आदौ मध्ये तथा चान्ते कुर्याद्ध्यापनं तु शुः॥
र्वं बलिद्रव्यमान्कृत्वा स्वजातिविहितां शुचीन्॥ आचार्यान्वरयेत्सम्यग्वेदवेदांगपारगान्॥ प्रतिमास्वप कु
5 वीतं स्वर्णेन सुशोभनाः॥ माषमात्रप्रमाणेन वित्तशाठ्यविवर्जितः॥३२॥ जटिलः साक्षसूत्राश्च
कमण्डलुसमन्विताः॥ सर्वे चाप्याकुलशोपेताः स्नानपेयब्राह्मणेषु च॥३३॥ स्नापयेद्विधिवत्तत्पंचामृतज
लैर्नहि॥ चंदनागरुकर्पूरैर्विलिप्य च सुगंधिभिः॥ समाच्छाद्य शुभैर्वस्त्रैः सोपवीतैर्यथाविधि॥ ए
वं पूजां मुनिर्वह्नर्हीन् अर्घ्यं दद्याद्यथापुरा॥ प्रीतये तु ऋषीणां हि होमं कुर्याद्यथाविधि॥ आचार्यं पू
जयेद्भक्त्या गंधमाल्यादिभूषणैः॥ प्रतिमां वस्त्रसंयुक्तां च दद्याद्धेनुं सदक्षिणां॥ आचार्याय विशेष
तः ध्यायाद्वित्तानुसारतः॥ अनुज्ञया गुरोः पश्चाद्ब्राह्मणेभ्यो निवेदयेत्॥ प्रतिमां वस्त्रसंयुक्तां भोजयित्वा यथा

मा॥

विधिः॥ अनेन विधिना सम्यक् व्रतमेतत्समाचरेत्॥ गच्छ विप्र गृहं शीघ्रं व्रतं चर सुपुण्यदं॥ तच्छ्रुत्वा
सुमतिर्वाक्यं परमं स्वपित्राप्रापितं॥ गृहमेत्य व्रतं चक्रे सभार्यः श्रद्धयान्वितः॥ व्रतं तु ऋषिपंचम्याः सर्वपा
पप्रनाशनं॥ कृत्वा सर्वं यथोक्तं च माता पित्रोः फलं ददौ॥ व्रतपुण्यप्रभावेन माता तस्य च योनितः॥ मुक्ता॥
नृपतिशार्दूल विमानवरसंस्थिता॥ दिव्यांबरधरा भूत्वा गता स्वर्गं च भारत॥ पितापि सोमदत्तो गच्छत् सुमतेः पुत्र
पिता स्वर्गं मा[illegible]महाराज व्रतस्यास्य प्रभावतः॥ कायिकं वाचिकं वापि मानसं यच्च दुष्कृतं॥ तत्सर्वं विलयं याति
व्रतस्यास्य प्रभावतः॥ यः स्वयं कुरुते पुण्यं तच्छृणुष्व द्विजोत्तम॥ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं॥ सर्वदानेषु
दानेषु तद्देत[illegible]॥ कुरुते या व्रतं नारी सा भवेत्सुखभोगिनी॥ रूपलावण्ययुक्ता च पुत्रपौत्रादिसंयुता॥ इहलो
के [illegible] स्यात् परत्रे च परां गतिं॥ एतत्ते कथितं राजन् व्रतानामुत्तमं व्रतं॥ सर्वसंपत्प्रदं चैव नारीणां [illegible]
नी॥ [illegible] स्वर्गं च पुत्रानपि युधिष्ठिर॥ पठतां शृण्वतां वापि सर्वपापप्रना[redacted]शनं॥ इति श्रीभविष्योत्तर
[illegible] ऋषिपंचमीव्रतकथा समाप्ता॥ युधिष्ठिर उवाच॥ किमस्योद्यापनं प्रोक्तं व्रतपूर्णफलप्रदं॥ सुमतिः [illegible]
नाचकार [illegible]॥ श्रीकृष्ण उवाच॥ पूर्वस्मिन्दिवसे कुर्याद् एकभक्तं समाहितः॥ प्रातरुत्थाय सुस्नातः॥ ततो गुरुगृहं [illegible]
तु: प्रार्थयित्वा [illegible] ॥ दंतधावनविधिना स्नात्वा [illegible] समाहितः॥ शुचौ देशे समालिप्य सर्व

कपालुराम

...डलेन वर्णैः समालं कुंभं तां स्थापयेद्वना ॥ संस्थाप्य वस्त्रसंवीत कंठदेशासुशोभनं ॥ पंचरत्नसमायुक्तं फलसंयुतं ...
...तं ॥ सहिरण्यं समाच्छाद्य ताम्रपात्रेण पट्टलेन वै ॥ वंशपात्रेण पात्रेण च वपूर्णेन चैव हि ॥ आच्छादयेत्तच्चलेन सितेन ...
...तः ॥ सौवर्णी प्रतिमा कार्या ऋषीणां भावितात्मनां ॥ पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥ शक्त्या वाकारये...
...द्वित्तशाठ्यविवर्जितः ॥ वितानं पंचवर्णं च फलपुष्पसमन्वितं ॥ तस्योपरि श्रीमत्संस्थापयेत्सन्निधाय च ॥ मध्ये...
...पेत्कुंभ ऋषीन् श्रद्धासमन्वितः ॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गौतमः ॥ जमदग्निर्वशिष्ठश्च साध्वी चैव...
...न्धती ॥ मंत्रेणानेन राजेन्द्र तत्ता पूजां समाहितः ॥ रात्रौ जागरणं कुर्यात्पुराणश्रवणादिभिः ॥ ततः प्रभाते विमले स्नात्वा तु...
...सन्निधौ ॥ ऋषीणां नामपि पौराणैः अधिकान्मनुसत्तम ॥ अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥ पुनः पूजां ततः कृत्वा...
...स्वर्णं कुंभे पवासोपि कं कुंडलम् तथा जनैः ॥ दद्यादेकां च संस्थां च गुरवे गां पयस्विनीं ॥ पूजयेत्...
...सपत्नीकं प्रतिपद्विपेंद्रे ॥ कलशानुपवीतांश्च दद्यात्तेभ्यः सुभक्तितः ॥ आचार्यं च सपत्नीकं प्रणिपत्य क्षमापयेत् ॥
...ब्राह्मणान् शक्त्या दीनानाथांश्च तर्पयेत् ॥ सोपस्करं तं प्रतिमामाचार्याय निवेदयेत् ॥ लब्ध्वानुज्ञां तु संस्नाय इष्टबंधु...
...सह ॥ उद्यापनविधिः ... सनेत्रा पंचफलान्वितां ॥ एवं या कुरुते भूप उद्यापनविधिं परं ॥ सर्वपापविनिर्मुक्ता...
...लोके महीयते ॥ इह लोके चिरं कालं भर्त्रा सह शुचिस्मिता ॥ पुत्रपौत्रैः परिवृता भुक्त्वा भोगान्मनोहरान् ॥ ...
...चाधश्चाद... ॥ इति श्रीभविष्यपुराणे ऋषिपंचमीव्रतोद्यापनं समाप्तं ॥ एवं ... शुभं ...